# Indrakshi Kavacha Stotram

ॐ अस्य श्रीइन्द्राक्षी कवचस्तोत्र महामन्त्रस्य शचीपुरन्दर ऋषिः -अनुष्टुप् छन्दः -श्रीइन्द्राक्षी भगवती देवता -ह्रीं बीजं -श्रीं शक्तिः -क्लीं कीलकं -गायत्री सावित्री सरस्वती कवचं -आत्मनः वाङ्मनःकायोपार्जित पापनिवारणार्थे श्रीइन्द्राक्षी भगवती प्रसाद सिद्धिद्वारा सकलकामना सिद्ध्यर्थे पाठे विनियोगः ॥

अथ करन्यासः
ॐ लक्ष्म्यै अङ्गुष्ठाभ्यां नमः
ॐ भुवनेश्वर्यै तर्जनीभ्यां नमः
ॐ माहेश्वर्यै मध्यमाभ्यां नमः
ॐ वज्रहस्तायै अनामिकाभ्यां नमः
ॐ सहस्रनयनायै कनिष्ठिकाभ्यां नमः
ॐ इन्द्राक्ष्यै भगवत्यै करतलकरपृष्ठाभ्यां नमः

अथ अङ्गन्यासः
ॐ लक्ष्म्यै हृदयाय नमः
ॐ भुवनेश्वर्यै शिरसे स्वाहा
ॐ माहेश्वर्यै शिखायै वषट्

ॐ वज्रहस्तायै कवचाय हुं
ॐ सहस्रनयनायै नेत्राभ्यां वौषट्
ॐ इन्द्राक्ष्यै भगवत्यै अस्त्राय फट्

अथ ध्यानम्
इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रधरां शुभाम्।
वामे वज्रधरां सव्यहस्तेऽभयवरप्रदाम्॥
सहस्रनेत्रां सूर्याभां नानालङ्कारभूषिताम्।
प्रसन्नवदनां नित्यामप्सरोगणसेविताम्॥
श्रीदुर्गां सौम्यवदनां पाशाङ्कुशधरां पराम्।
त्रैलोक्यमोहिनीं देवीं भवानीं प्रणमाम्यहम्॥

इन्द्वग्निसूर्यनयनां पाशाङ्कुशधरां पराम्।
द्विभुजां सिंहमध्यस्थां भजेऽहमभयङ्करीम्॥

अथ इन्द्र गायत्री
ॐ शचीपतये विद्महे -पाकशासनाय धीमहि -तन्नो इन्द्रः प्रचोदयात्॥

मूलमन्त्रः
प्रणवं कमलां मायां वाग्भवं शक्तिमन्मथौ।
इन्द्राक्षि वज्रहस्ते च हरमन्त्रेऽग्निवल्लभा॥

शक्तिबीजं पठेदादौ ठद्वयान्ते च मन्मथम् ।
इन्द्राक्षीमन्त्रराजस्य स्यादुत्कीलनको मनुः ॥

मन्मथं शक्तिबीजं च जपेदादौ च साधकः ।
इन्द्राक्षीमूलमन्त्रस्य सञ्जीवनमनुः परः ॥

तारं वाणी शरत्काममिन्द्राक्षि ब्रह्मलाञ्छनम् ।
मोचय द्वयमापश्च विद्येयं शापनाशिनी ॥

शक्तिमादौ पठेन्मन्त्री वाणीमन्ते महेश्वरि ।
इन्द्राक्ष्या वज्रहस्ताया मन्त्रोऽयं सम्पुटाभिदः ॥

बिन्दुस्त्रिकोणजषडस्रषडस्रयुक्त-
षट्कोणवृत्तवसुपत्रकलाश्रमिश्रम् ।
भूगेहबिम्बमनलेन शशिप्रभाभ-
मिन्द्राक्षिणी प्रियतरं जयचक्रमेतत् ॥

इन्द्राक्षी पूर्वतः पातु पात्वाग्नेय्यां दशेश्वरी ।
कौमारी दक्षिणे पातु नैर्ऋत्यां पातु पार्वती ॥
वाराही पश्चिमे पातु वायव्ये नारसिंह्यपि ।
उदीच्यां कालरात्रिर्मामैशान्यां सर्वशक्तयः ॥
भैरव्यूर्ध्वं सदा पातु पात्वधो वैष्णवी सदा ।

एवं दशदिशो रक्षेत् सर्वाङ्गं भुवनेश्वरी ॥

ॐ नमो भगवत्यै इन्द्राक्ष्यै महालक्ष्म्यै सर्वजनवशकर्यै सर्वदुष्टग्रहस्तम्भिन्यै स्वाहा।

ॐ नमो भगवति पिङ्गलभैरवि त्रैलोक्यलक्ष्मि त्रैलोक्यमोहिनि इन्द्राक्षि मां रक्ष रक्ष हुं फट् स्वाहा।

ॐ नमो भगवति भद्रकालि महादेवि कृष्णवर्णे तुङ्गस्तनि शूर्पहस्ते कवाटवक्षःस्थले कपालधरे परशुधरे चापधरे विकृतरूपधरे महाकृष्णसर्पयज्ञोपवीतिनि भस्मोद्धूलितसर्वगात्रि इन्द्राक्षि मां रक्ष रक्ष हुं फट् स्वाहा।

ॐ नमो भगवति प्राणेश्वरि पद्मासने सिंहवाहने महिषासुरमर्दिनि उष्णज्वर पित्तज्वर वातज्वर श्लेष्मज्वर कफज्वर आलापज्वर सन्निपातज्वर कृत्रिमज्वर कृत्यादिज्वर एकाहिकज्वर द्वयाहिकज्वर त्र्याहिकज्वर चातुर्थिकज्वर पञ्चाहिकज्वर पक्षज्वर मासज्वर षण्मासज्वर संवत्सरज्वर सर्वाङ्गज्वरान् नाशय नाशय हर हर जहि जहि दह दह पच पच ताडय ताडय आकर्षय आकर्षय विद्विषः स्तम्भय स्तम्भय मोहय मोहय उच्चाटय उच्चाटय हुं फट् स्वाहा ॐ ह्रीं।

ॐ नमो भगवति प्राणेश्वरि पद्मासने लम्बोष्ठि कम्बुकण्ठिके कालि कामरूपिणि परमन्त्र परयन्त्र परतन्त्र प्रभेदिनि प्रतिपक्षविध्वंसिनि परबलदुर्गविमर्दिनि शत्रुकरच्छेदिनि सकलदुष्टज्वरनिवारिणि भूतप्रेतपिशाच ब्रह्मराक्षस यक्षयमदूत शाकिनी डाकिनी कामिनी स्तम्भिनी मोहिनी वशङ्करी कुक्षिरोग शिरोरोग नेत्ररोग क्षयापस्मारकुष्ठादि महारोगनिवारिणि मम सर्वरोगान् नाशय नाशय ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फट् स्वाहा।

ॐ ऐं श्रीं हुं दुं इन्द्राक्षि मां रक्ष रक्ष मम शत्रून् नाशय नाशय जलरोगान् शोषय शोषय दुःखव्याधीन् स्फोटय स्फोटय क्रूरानरीन् भञ्जय भञ्जय मनोग्रन्थि प्राणग्रन्थि शिरोग्रन्थीन् स्फोटय स्फोटय इन्द्राक्षि मां रक्ष रक्ष हुं फट् स्वाहा।

ॐ नमो भगवति माहेश्वरि चिन्तामणि दुर्गे सकलसिद्धेश्वरि सकलजनमनोहारिणि कालि कालरात्र्यनले अजिते अभये महाघोररूपे विष्णुरूपिणि मधुसूदनि महाविष्णुस्वरूपिणि नेत्रशूल कर्णशूल कटिशूल पक्षशूल पाण्डुरोग कामलादीन् नाशय नाशय वैष्णवि ब्रह्मास्त्रेण विष्णुचक्रेण रुद्रशूलेन यमदण्डेन वरुणपाशेन वासववज्रेण सर्वानरीन् भञ्जय भञ्जय यक्षग्रह राक्षसग्रह स्कन्दग्रह विनायकग्रह बालग्रह चौरग्रह कूष्माण्डग्रहादीन् निगृह्ण निगृह्ण राजयक्ष्म क्षयरोग तापज्वरनिवारिणि मम सर्वज्वरान् नाशय नाशय सर्वग्रहान् उच्चाटय उच्चाटय हुं फट् स्वाहा।

इन्द्र उवाच

इन्द्राक्षी नाम सा देवी दैवतैः समुदाहृता ।
गौरी शाकम्भरी देवि दुर्गा नाम्नीति विश्रुता ॥
कात्यायनी महादेवी चण्डघण्टा महातपा ।
गायत्री सा च सावित्री ब्रह्माणी ब्रह्मवादिनी ॥
नारायणी भद्रकाली रुद्राणी कृष्णपिङ्गला ।
अग्निज्वाला रौद्रमुखी कालरात्रिः तपस्विनी ॥
मेघश्यामा सहस्राक्षी विष्णुमाया जलोदरी ।
महोदरी मुक्तकेशी घोररूपा महाबला ॥
आनन्दा भद्रजा नन्दा रोगहर्त्री शिवप्रिया ।
शिवदूती कराली च प्रत्याक्षा परमेश्वरी ॥
इन्द्राणी चेन्द्ररूपा च इन्द्रशक्तिपरायणा ।
महिषासुरसंहर्त्री चामुण्डा गर्भदेवता ॥
वाराही नारसिंही च भीमा भैरवनादिनी ।
श्रुतिः स्मृतिर्धृतिर्मेधा विद्या लक्ष्मीः सरस्वती ॥
अनन्ता विजया पूर्णा मानस्तोषाऽपराजिता ।
भवानी पार्वती दुर्गा हैमवत्यम्बिकाऽशिवा ॥
शिवा भवानी रुद्राणी शङ्करार्धशरीरिणी ।
सदा सम्मोहिनी देवी सुन्दरी भुवनेश्वरी ॥
त्रिनेत्रा त्रिपुराराध्या सर्वात्मा कमलात्मिका ।

चण्डी भगवती भद्रा सिद्धिबुद्धिसमन्विता ॥
एकाक्षरी परा ब्राह्मी स्थूलसूक्ष्मप्रवर्तिनी ।
नित्या सकलकल्याणी भोगमोक्षप्रदायिनी ॥
ऐरावतगजारूढा वज्रहस्ता वरप्रदा ।
भ्रामरी कालरात्रिश्च क्वणन्माणिक्यनूपुरा ॥
त्रिपाद्भस्मप्रहरणा त्रिशिरा रक्तलोचना ।
शिवा च शिवरूपा च शिवभक्तिपरायणा ॥

फलश्रुतिः
एतैर्नामपदैर्दिव्यैः स्तुता शक्रेण धीमता ।
आयुरारोग्यमैश्वर्यं सुखसम्पत्तिकारकम् ॥
क्षयापस्मारकुष्ठादि तापज्वरनिवारकम् ।
शतमावर्तयेद्यस्तु मुच्यते व्याधिबन्धनात् ॥
आवर्तयेत् सहस्रेण लभते वाञ्छितं फलम् ।
राजा वशमवाप्नोति सत्यमेव न संशयः ॥
लक्षमेकं जपेद्यस्तु साक्षाद्देवी स पश्यति ।
त्रिकालं पठते नित्यं धनधान्यविवर्धनम् ॥
अर्धरात्रे पठेन्नित्यं मुच्यते व्याधिबन्धनात् ।
ऐन्द्रस्तोत्रमिदं पुण्यं जपतः फलमाप्नुयात् ॥
विनाशाय तु रोगाणामपमृत्युहराय च ।
राज्यार्थी लभते राज्यं धनार्थी विपुलं धनम् ॥

इच्छाकामं तु कामार्थी धर्मार्थी धर्ममव्ययम् ।
विद्यार्थी लभते विद्यां मोक्षार्थी परमं पदम् ।
इन्द्रेण कथितं स्तोत्रं सत्यं सत्यं न संशयः ॥

॥ इति शिवम् ॥

OM asya śrīindrākṣī kavacastotra mahāmantrasya śacīpurandara ṛṣiḥ -anuṣṭup chandaḥ -śrīindrākṣī bhagavatī devatā -hrīṃ bījaṃ -śrīṃ śaktiḥ -klīṃ kīlakaṃ -gāyatrī sāvitrī sarasvatī kavacaṃ -ātmanaḥ vāṅmanaḥkāyopārjita pāpanivāraṇārthe śrīindrākṣī bhagavatī prasāda siddhidvārā sakalakāmanā siddhyarthe pāṭhe viniyogaḥ ||

atha karanyāsaḥ
OM lakṣmyai aṅguṣṭhābhyāṃ namaḥ
OM bhuvaneśvaryai tarjanībhyāṃ namaḥ
OM māheśvaryai madhyamābhyāṃ namaḥ
OM vajrahastāyai anāmikābhyāṃ namaḥ
OM sahasranayanāyai kaniṣṭhikābhyāṃ namaḥ
OM indrākṣyai bhagavatyai karatalakarapṛṣṭhābhyāṃ namaḥ

atha aṅganyāsaḥ
OM lakṣmyai hṛdayāya namaḥ
OM bhuvaneśvaryai śirase svāhā
OM māheśvaryai śikhāyai vaṣaṭ
OM vajrahastāyai kavacāya huṃ

OM sahasranayanāyai netrābhyāṃ vauṣaṭ
OM indrākṣyai bhagavatyai astrāya phaṭ

atha dhyānam
indrākṣīṃ dvibhujāṃ devīṃ pītavastradharāṃ śubhām |
vāme vajradharāṃ savyahaste.abhayavarapradām ||
sahasranetrāṃ sūryābhāṃ nānālaṅkārabhūṣitām |
prasannavadanāṃ nityāmapsarogaṇasevitām ||
śrīdurgāṃ saumyavadanāṃ pāśāṅkuśadharāṃ parām |
trailokyamohinīṃ devīṃ bhavānīṃ praṇamāmyaham ||

indvagnisūryanayanāṃ pāśāṅkuśadharāṃ parām |
dvibhujāṃ siṃhamadhyasthāṃ bhaje.ahamabhayaṅkarīm ||

atha indra gāyatrī
OM śacīpataye vidmahe -pākaśāsanāya dhīmahi -tanno indraḥ pracodayāt ||

mūlamantraḥ
praṇavaṃ kamalāṃ māyāṃ vāgbhavaṃ śaktimanmathau |
indrākṣi vajrahaste ca haramantre.agnivallabhā ||

śaktibījaṃ paṭhedādau ṭhadvayānte ca manmatham |
indrākṣīmantrarājasya syādutkīlanako manuḥ ||

manmathaṃ śaktibījaṃ ca japedādau ca sādhakaḥ |
indrākṣīmūlamantrasya sañjīvanamanuḥ paraḥ ||

tāraṃ vāṇī śaratkāmamindrākṣi brahmalāñchanam |
mocaya dvayamāpaśca vidyeyaṃ śāpanāśinī ||

śaktimādau paṭhenmantrī vāṇīmante maheśvari |
indrākṣyā vajrahastāyā mantro.ayaṃ sampuṭābhidaḥ ||

bindustrikoṇajaṣaḍasraṣaḍasrayukta-
ṣaṭkoṇavṛttavasupatrakalāśramiśram |
bhūgehabimbamanalena śaśiprabhābha-
mindrākṣiṇī priyataraṃ jayacakrametat ||

indrākṣī pūrvataḥ pātu pātvāgneyyāṃ daśeśvarī |
kaumārī dakṣiṇe pātu nairṛtyāṃ pātu pārvatī ||
vārāhī paścime pātu vāyavye nārasiṃhyapi |
udīcyāṃ kālarātrirmāmaiśānyāṃ sarvaśaktayaḥ ||
bhairavyūrdhvaṃ sadā pātu pātvadho vaiṣṇavī sadā |
evaṃ daśadiśo rakṣet sarvāṅgaṃ bhuvaneśvarī ||

OM namo bhagavatyai indrākṣyai mahālakṣmyai
sarvajanavaśakaryai sarvaduṣṭagrahastambhinyai svāhā |

OM namo bhagavati piṅgalabhairavi trailokyalakṣmi
trailokyamohini indrākṣi māṃ rakṣa rakṣa huṃ phaṭ svāhā |

OM namo bhagavati bhadrakāli mahādevi kṛṣṇavarṇe tuṅgastani
śūrpahaste kavāṭavakṣaḥsthale kapāladhare paraśudhare
cāpadhare vikṛtarūpadhare mahākṛṣṇasarpayajñopavītini
bhasmoddhūlitasarvagātri indrākṣi māṃ rakṣa rakṣa huṃ phaṭ

svāhā |

OM namo bhagavati prāṇeśvari padmāsane siṃhavāhane mahiṣāsuramardini uṣṇajvara pittajvara vātajvara śleṣmajvara kaphajvara ālāpajvara sannipātajvara kṛtrimajvara kṛtyādijvara ekāhikajvara dvayāhikajvara tryāhikajvara cāturthikajvara pañcāhikajvara pakṣajvara māsajvara ṣaṇmāsajvara saṃvatsarajvara sarvāṅgajvarān nāśaya nāśaya hara hara jahi jahi daha daha paca paca tāḍaya tāḍaya ākarṣaya ākarṣaya vidviṣaḥ stambhaya stambhaya mohaya mohaya uccāṭaya uccāṭaya huṃ phaṭ svāhā OM hrīṃ |

OM namo bhagavati prāṇeśvari padmāsane lamboṣṭhi kambukaṇṭhike kāli kāmarūpiṇi paramantra parayantra paratantra prabhedini pratipakṣavidhvaṃsini parabaladurgavimardini śatrukaracchedini sakaladuṣṭajvaranivāriṇi bhūtapretapiśāca brahmarākṣasa yakṣayamadūta śākinī ḍākinī kāminī stambhinī mohinī vaśaṅkarī kukṣiroga śiroroga netraroga kṣayāpasmārakuṣṭhādi mahāroganivāriṇi mama sarvarogān nāśaya nāśaya hrāṃ hrīṃ hrūṃ hraiṃ hrauṃ hraḥ phaṭ svāhā |

OM aiṃ śrīṃ huṃ duṃ indrākṣi māṃ rakṣa rakṣa mama śatrūn nāśaya nāśaya jalarogān śoṣaya śoṣaya duḥkhavyādhīn sphoṭaya sphoṭaya krūrānarīn bhañjaya bhañjaya manogranthi prāṇagranthi śirogranthīn sphoṭaya sphoṭaya indrākṣi māṃ rakṣa rakṣa huṃ phaṭ svāhā |

OM namo bhagavati māheśvari cintāmaṇi durge sakalasiddheśvari sakalajanamanohāriṇi kāli kālarātryanale ajite abhaye mahāghorarūpe viṣṇurūpiṇi madhusūdani mahāviṣṇusvarūpiṇi netraśūla karṇaśūla kaṭiśūla pakṣaśūla pāṇḍuroga kāmalādīn nāśaya nāśaya vaiṣṇavi brahmāstreṇa viṣṇucakreṇa rudraśūlena yamadaṇḍena varuṇapāśena vāsavavajreṇa sarvānarīn bhañjaya bhañjaya yakṣagraha rākṣasagraha skandagraha vināyakagraha bālagraha cauragraha kūṣmāṇḍagrahādīn nigṛhva nigṛhva rājayakṣma kṣayaroga tāpajvaranivāriṇi mama sarvajvarān nāśaya nāśaya sarvagrahān uccāṭaya uccāṭaya huṃ phaṭ svāhā |

indra uvāca
indrākṣī nāma sā devī daivataiḥ samudāhṛtā |
gaurī śākambharī devi durgā nāmnīti viśrutā ||
kātyāyanī mahādevī caṇḍaghaṇṭā mahātapā |
gāyatrī sā ca sāvitrī brahmāṇī brahmavādinī ||
nārāyaṇī bhadrakālī rudrāṇī kṛṣṇapiṅgalā |
agnijvālā raudramukhī kālarātriḥ tapasvinī ||
meghaśyāmā sahasrākṣī viṣṇumāyā jalodarī |
mahodarī muktakeśī ghorarūpā mahābalā ||
ānandā bhadrajā nandā rogahartrī śivapriyā |
śivadūtī karālī ca pratyākṣā parameśvarī ||
indrāṇī cendrarūpā ca indraśaktiparāyaṇā |
mahiṣāsurasaṃhartrī cāmuṇḍā garbhadevatā ||
vārāhī nārasiṃhī ca bhīmā bhairavanādinī |
śrutiḥ smṛtirdhṛtirmedhā vidyā lakṣmīḥ sarasvatī ||
anantā vijayā pūrṇā mānastoṣā.aparājitā |

bhavānī pārvatī durgā haimavatyambikā.aśivā ||
śivā bhavānī rudrāṇī śaṅkarārdhaśarīriṇī |
sadā sammohinī devī sundarī bhuvaneśvarī ||
trinetrā tripurārādhyā sarvātmā kamalātmikā |
caṇḍī bhagavatī bhadrā siddhibuddhisamanvitā ||
ekākṣarī parā brāhmī sthūlasūkṣmapravartinī |
nityā sakalakalyāṇī bhogamokṣapradāyinī ||
airāvatagajārūḍhā vajrahastā varapradā |
bhrāmarī kālarātriśca kvaṇanmāṇikyanūpurā ||
tripādbhasmapraharaṇā triśirā raktalocanā |
śivā ca śivarūpā ca śivabhaktiparāyaṇā ||

phalaśrutiḥ
etairnāmapadairdivyaiḥ stutā śakreṇa dhīmatā |
āyurārogyamaiśvaryaṃ sukhasampattikārakam ||
kṣayāpasmārakuṣṭhādi tāpajvaranivārakam |
śatamāvartayedyastu mucyate vyādhibandhanāt ||
āvartayet sahasreṇa labhate vāñchitaṃ phalam |
rājā vaśamavāpnoti satyameva na saṃśayaḥ ||
lakṣamekaṃ japedyastu sākṣāddevī sa paśyati |
trikālaṃ paṭhate nityaṃ dhanadhānyavivardhanam ||
ardharātre paṭhennityaṃ mucyate vyādhibandhanāt |
aindrastotramidaṃ puṇyaṃ japataḥ phalamāpnuyāt ||
vināśāya tu rogāṇāmapamṛtyuharāya ca |
rājyārthī labhate rājyaṃ dhanārthī vipulaṃ dhanam ||
icchākāmaṃ tu kāmārthī dharmārthī dharmamavyayam |
vidyārthī labhate vidyāṃ mokṣārthī paramaṃ padam |

indreṇa kathitaṃ stotraṃ satyaṃ satyaṃ na saṃśayaḥ ||

www.kamakotimandali.com